# Tandirishikritam Shiva Stotram

# તણ્ડિઋષિકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Tandirishikritam Shiva Stotram

File name : taNDiRRiShikRRitaMshivastotram.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | anuparva | adhyAya 16/13-65||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 15, 2025

*sanskritdocuments.org*

# તણ્ડિઋષિકૃતં શિવસ્તોત્રમ્

સ દૃષ્ટ્વાન્મહાદેવમસ્તૌષીચ્ચ સ્તવૈર્વિભુમ્ ।
પવિત્રાણાં પવિત્રસ્ત્વં ગતિર્ગતિમતાં વર ।
અત્યુગ્રં તેજસાં તેજસ્તપસાં પરમં તપઃ ॥ ૧૩॥

વિશ્વાવસુહિરણ્યાક્ષપુરુહૂતનમસ્કૃત ।
ભૂરિકલ્યાણદ વિભો પુરુસત્ય નમોઽસ્તુ તે ॥ ૧૪॥

જાતીમરણભીરૂણાં યતીનાં યતતાં વિભો ।
નિર્વાણદ સહસ્રાંશો નમસ્તેઽસ્તુ સુખાશ્રય ॥ ૧૫॥

બ્રહ્મા શતક્રતુર્વિષ્ણુર્વિશ્વેદેવા મહર્ષયઃ ।
ન વિદુસ્ત્વાં તુ તત્ત્વેન કુતો વેત્સ્યામહે વયમ્ ॥ ૧૬॥

ત્વત્તઃ પ્રવર્તતે કાલસ્ત્વયિ કાલશ્ચ લીયતે ।
કાલાખ્યઃ પુરુષાખ્યશ્ચ બ્રહ્માખ્યશ્ચ ત્વમેવ હિ ॥ ૧૭॥

તનવસ્તે સ્મૃતાસ્તિસ્રઃ પુરાણજ્ઞૈઃ સુરર્ષિભિઃ ।
અધિપૌરુષમધ્યાત્મમધિભૂતાધિદૈવતમ્ ।
અધિલોક્યાધિવિજ્ઞાનમધિયજ્ઞસ્ત્વમેવ હિ ॥ ૧૮॥

ત્વાં વિદિત્વાઽઽત્મદેહસ્થં દુર્વિદં દૈવતૈરપિ ।
વિદ્વાંસો યાન્તિ નિર્મુક્તાઃ પરં ભાવમનામયમ્ ॥ ૧૯॥

અનિચ્છતસ્તવ વિભો જન્મમૃત્યુરનેકતઃ ।
દ્વારં ત્વં સ્વર્ગમોક્ષાણામાક્ષેપ્તા ત્વં દદાસિ ચ ॥ ૨૦॥

ત્વમેવ મોક્ષઃ સ્વર્ગશ્ચ કામઃ ક્રોધસ્ત્વમેવ હિ ।
સત્ત્વં રજસ્તમશ્ચૈવ અધશ્ચોર્ધ્વં ત્વમેવ હિ ॥ ૨૧॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ સ્કન્દેન્દ્રૌ સવિતા યમઃ ।
વરુણેન્દૂ મનુર્ધાતા વિધાતા ત્વં ધનેશ્વરઃ ॥ ૨૨॥

ભૂર્વાયુર્જ્યોતિરાપશ્ચ વાગ્બુદ્ધિસ્ત્વં મતિર્મનઃ ।
કર્મ સત્યાનૃતે ચોભે ત્વમેવાસ્તિ ચ નાસ્તિ ચ ॥ ૨૩॥

ઇન્દ્રિયાણીન્દ્રિયાર્થાશ્ચ તત્પરં પ્રકૃતેર્ધ્રુવમ્ ।
વિશ્વાવિશ્વપરો ભાવશ્ચિન્ત્યાચિન્ત્યસ્ત્વમેવ હિ ॥ ૨૪॥

યચ્ચૈતત્પરમં બ્રહ્મ યચ્ચ તત્પરમં પદમ્ ।
યા ગતિઃ સાઙ્ખ્યયોગાનાં સ ભવાન્નાત્ર સંશયઃ ॥ ૨૫॥

નૂનમદ્ય કૃતાર્થાઃ સ્મ નૂનં પ્રાપ્તાઃ સતાં ગતિમ્ ।
યાં ગતિં પ્રાપ્નુવન્તીહ જ્ઞાનનિર્મલબુદ્ધયઃ ॥ ૨૬॥

અહો મૂઢાઃ સ્મ સુચિરમિમં કાલમચેતસઃ ।
યન્ન વિદ્મઃ પરં દેવં શાશ્વતં યં વિદુર્બુધાઃ ॥ ૨૭॥

સોઽયમાસાદિતઃ સાક્ષાદ્બહુભિર્જન્મભિર્મયા ।
ભક્તાનુગ્રહકૃદ્દેવો યં જ્ઞાત્વામૃતમશ્નુતે ॥ ૨૮॥

દેવાસુરમનુષ્યાણાં યચ્ચ ગુહ્યં સનાતનમ્ ।
ગુહાયાં નિહિતં બ્રહ્મ દુર્વિજ્ઞેયં સુરૈરપિ ॥ ૨૯॥

સ એષ ભગવાન્દેવઃ સર્વકૃત્સર્વતોમુખઃ ।
સર્વાત્મા સર્વદર્શી ચ સર્વગઃ સર્વવેદિતા ॥ ૩૦॥

પ્રાણકૃત્પ્રાણભૃત્પ્રાણી પ્રાણદઃ પ્રાણિનાં ગતિઃ ।
દેહકૃદ્દેહભૃદ્દેહી દેહભુગ્દેહિનાં ગતિઃ ॥ ૩૧॥

અધ્યાત્મગતિનિષ્ઠાનાં ધ્યાનિનામાત્મવેદિનામ્ ।
અપુનર્મારકામાનાં યા ગતિઃ સોઽયમીશ્વરઃ ॥ ૩૨॥

અયં ચ સર્વભૂતાનાં શુભાશુભગતિપ્રદઃ ।
અયં ચ જન્મમરણે વિદધ્યાત્સર્વજન્તુષુ ॥ ૩૩॥

અયં ચ સિદ્ધિકામાનામૃષીણાં સિદ્ધિદઃ પ્રભુઃ ।
અયં ચ મોક્ષકામાનાં દ્વિજાનાં મોક્ષદઃ પ્રભુઃ ॥ ૩૪॥

ભૂરાદ્યાન્સર્વભુવનાનુત્પાદ્ય સદિવૌકસઃ ।
વિભર્તિ દેવસ્તનુભિરષ્ટાભિશ્ચ દદાતિ ચ ॥ ૩૫॥

અતઃ પ્રવર્તતે સર્વમસ્મિન્સર્વં પ્રતિષ્ઠિતમ્ ।
અસ્મિંશ્ચ પ્રલયં યાતિ અયમેકઃ સનાતનઃ ॥ ૩૬॥

અયં સ સત્યકામાનાં સત્યલોકઃ પરઃ સતામ્ ।
અપવર્ગશ્ચ મુક્તાનાં કૈવલ્યં ચાત્મવાદિનામ્ ॥ ૩૭॥

અયં બ્રહ્માદિભિઃ સિદ્ધૈર્ગુહાયાં ગોપિતઃ પ્રભુઃ ।
દેવાસુરમનુષ્યાણાં ન પ્રકાશો ભવેદિતિ ॥ ૩૮॥

તં ત્વાં દેવાસુરનરાસ્તત્ત્વેન ન વિદુર્ભવમ્ ।
મોહિતાઃ ખલ્વનેનૈવ હૃચ્છયેન પ્રવેશિતાઃ ॥ ૩૯॥

યે ચૈનં સમ્પ્રપદ્યન્તે ભક્તિયોગેન ભારત ।
તેષામેવાત્મનાત્માનં દર્શયત્યેષ હૃચ્છયઃ ॥ ૪૦॥

યં જ્ઞાત્વા ન પુનર્જન્મ મરણં ચાપિ વિદ્યતે ।
યં વિદિત્વા પરં વેદ્યં વેદિતવ્યં ન વિદ્યતે ॥ ૪૧॥

યં લબ્ધ્વા પરમં લાભં મન્યતે નાધિકં પુનઃ ।
પ્રાણસૂક્ષ્માં પરાં પ્રાપ્તિમાગચ્છત્યક્ષયાવહામ્ ॥ ૪૨॥

યં સાઙ્ખ્યા ગુણતત્ત્વજ્ઞાઃ સાઙ્ખ્યશાસ્ત્રવિશારદાઃ ।
સૂક્ષ્મજ્ઞાનરતાઃ પૂર્વં જ્ઞાત્વા મુચ્યન્તિ બન્ધનૈઃ ॥ ૪૩॥

યં ચ વેદવિદો વેદ્યં વેદાન્તેષુ પ્રતિષ્ઠિતમ્ ।
પ્રાણાયામપરા નિત્યં યં વિશન્તિ જપન્તિ ચ ॥ ૪૪॥

અયં સ દેવયાનાનામાદિત્યો દ્વારમુચ્યતે ।
અયં ચ પિતૃયાનાનાં ચન્દ્રમા દ્વારમુચ્યતે ॥ ૪૫॥

એષ કાલગતિશ્ચિત્રા સંવત્સરયુગાદિષુ ।
ભાવાભાવૌ તદાત્વે ચ અયને દક્ષિણોત્તરે ॥ ૪૬॥

એવં પ્રજાપતિઃ પૂર્વમારાધ્ય બહુભિઃ સ્તવૈઃ ।
વરયામાસ પુત્રત્વે નીલલોહિતસંજ્ઞિતમ્ ॥ ૪૭॥

ઋગ્ભિર્યમનુશંસન્તિ તન્ત્રે કર્મણિ બહ્વૃચઃ ।
યજુર્ભિર્યં ત્રિધા વેદ્યં જુહ્વત્યધ્વર્યવોઽધ્વરે ॥ ૪૮॥

સામભિર્યં ચ ગાયન્તિ સામગાઃ શુદ્ધબુદ્ધયઃ ।
યજ્ઞસ્ય પરમા યોનિઃ પતિશ્ચાયં પરઃ સ્મૃતઃ ॥ ૪૯॥

રાત્ર્યહઃશ્રોત્રનયનઃ પક્ષમાસશિરોભુજઃ ।

ઋતુવીર્યસ્તપો ધૈર્યો હ્યબ્દગુહ્યોરુપાદવાન્ ॥ ૫૦॥

મૃત્યુર્યમો હુતાશશ્ચ કાલઃ સંહારવેગવાન્ ।
કાલસ્ય પરમા યોનિઃ કાલશ્ચાયં સનાતનઃ ॥ ૫૧॥

ચન્દ્રાદિત્યૌ સનક્ષત્રૌ સગ્રહૌ સહ વાયુના ।
ધ્રુવઃ સપ્તર્ષયશ્ચૈવ ભુવનાઃ સપ્ત એવ ચ ॥ ૫૨॥

પ્રધાનં મહદવ્યક્તં વિશેષાન્તં સવૈકૃતમ્ ।
બ્રહ્માદિ સ્તમ્બપર્યન્તં ભૂતાદિ સદસચ્ચ યત્ ॥ ૫૩॥

અષ્ટૌ પ્રકૃતયશ્ચૈવ પ્રકૃતિભ્યશ્ચ યત્પરમ્ ।
અસ્ય દેવસ્ય યદ્ભાગં કૃત્સ્નં સમ્પરિવર્તતે ॥ ૫૪॥

એતત્પરમમાનન્દં યત્તચ્છાશ્વતમેવ ચ ।
એષા ગતિર્વિરક્તાનામેષ ભાવઃ પરઃ સતામ્ ॥ ૫૫॥

એતત્પદમનુદ્વિગ્નમેતદ્બ્રહ્મ સનાતનમ્ ।
શાસ્ત્રવેદાઙ્ગવિદુષામેતદ્ધ્યાનં પરં પદમ્ ॥ ૫૬॥

ઇયં સા પરમા કાષ્ઠા ઇયં સા પરમા કલા ।
ઇયં સા પરમા સિદ્ધિરિયં સા પરમા ગતિઃ ॥ ૫૭॥

ઇયં સા પરમા શાન્તિરિયં સા નિર્વૃતિઃ પરા ।
યં પ્રાપ્ય કૃતકૃત્યાઃ સ્મ ઇત્યમન્યન્ત વેધસઃ ॥ ૫૮॥

ઇયં તુષ્ટિરિયં સિદ્ધિરિયં શ્રુતિરિયં સ્મૃતિઃ ।
અધ્યાત્મગતિનિષ્ઠાનાં વિદુષાં પ્રાપ્તિરવ્યયા ॥ ૫૯॥

યજતાં યજ્ઞકામાનાં યજ્ઞૈર્વિપુલદક્ષિણૈઃ ।
યા ગતિર્દૈવતૈર્દિવ્યા સા ગતિસ્ત્વં સનાતન ॥ ૬૦॥

જપ્યહોમવ્રતૈઃ કૃચ્છ્રૈર્નિયમૈર્દેહપાતનૈઃ ।
તપ્યતાં યા ગતિર્દેવ વૈરાજે સા ગતિર્ભવાન્ ॥ ૬૧॥

કર્મન્યાસકૃતાનાં ચ વિરક્તાનાં તતસ્તતઃ ।
યા ગતિર્બ્રહ્મભવને સા ગતિસ્ત્વં સનાતન ॥ ૬૨॥

અપુનર્મારકામાનાં વૈરાગ્યે વર્તતાં પરે ।
વિકૃતીનાં લયાનાં ચ સા ગતિસ્ત્વં સનાતન ॥ ૬૩॥

જ્ઞાનવિજ્ઞાનનિષ્ઠાનાં નિરુપાખ્યા નિરઞ્જના ।
કૈવલ્યા યા ગતિર્દેવ પરમા સા ગતિર્ભવાન્ ॥ ૬૪॥

વેદશાસ્ત્રપુરાણોક્તાઃ પઞ્ચૈતા ગતયઃ સ્મૃતાઃ ।
ત્વત્પ્રસાદાદ્ધિ લભ્યન્તે ન લભ્યન્તેઽન્યથા વિભો ॥ ૬૫॥

ઇતિ તણ્ડિસ્તપોયોગાત્તુષ્ટાવેશાનમવ્યયમ્ ।
જગૌ ચ પરમં બ્રહ્મ યત્પુરા લોકકૃજ્જગૌ ॥ ૬૬॥

ઇતિ મહાભારતે અનુશાસનપર્વણિ ૧૬ અધ્યાયાન્તર્ગતં
તણ્ડિઋષિકૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । અનુપર્વ । અધ્યાય ૧૬/૧૩-૬૫॥

mahAbhArata . anuparva . adhyAya 16/13-65..

Proofread by PSA Easwaran

---

*Tandirishikritam Shiva Stotram*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*